योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः १५

पञ्चदशः सर्गः १५

श्रीवसिष्ठ उवाच ।

एतामनुसरन्नाम चित्तसत्तामपावनीम् ।

संसारबीजकणिकां जीवबन्धनवागुराम् ।। १

आत्मा त्यक्तात्मरूपाभो मलिनामाप तद्दृशम् ।

चित्तं समनुसंधत्ते धत्ते च कलनामलम् ।। २

वर्धमानमहामोहदायिनी भयकारिणी ।

तृष्णा विषलतारूपा मूर्च्छामेव प्रयच्छति ।। ३

यदा यदोदेति तदा महामोहप्रदायिनी ।

तृष्णा कृष्णानिशेवेयमनन्तात्मविकारिणी ।। ४

कल्पानलशिखादाहं सोढुं शक्ता हरादयः ।

तृष्णानलशिखादाहं सोढुं शक्ता न केचन ।। ५

तीक्ष्णा कृष्णा सुदीर्घा च वहत्यङ्गं सदा निजम् ।

शीतलैवासुखोदर्का घोरा तृष्णाकृपाणिका ।। ६

यान्येतानि दुरन्तानि दुर्जराण्युन्नतानि च ।

तृष्णावल्ल्याः फलानीह तानि दुःखानि राघव ।। ७

अदृश्यैवात्ति मांसास्थिरुधिरादि शरीरकात् ।

मनोबिलविलीनैषा तृष्णावनशुनी नृणाम् ।। ८

क्षणमुल्लासमायाति क्षणमायाति शून्यताम् ।

जडा विदलयत्याशु तृष्णाप्रावृट्तरङ्गिणी ।। ९

दृष्टदैन्यो हतस्वान्तो हतौजा याति नीचताम् ।

मुह्यते रौति पतति तृष्णयाभिहतो जनः ।। १०

न स्थिता कोटरे यस्य तृष्णाकृष्णभुजङ्गमो ।

तस्य प्राणानिलाः स्वस्थाः पुंसो हृदयरन्ध्रगाः ।। ११

नूनमस्तंगतो यत्र तृष्णाकृष्णनिशाक्रमः ।

पुण्यानि तत्र वर्धन्ते शुक्लपक्ष इवेन्दवः ।। १२

यो न तृष्णाघुणावल्ल्या क्षतः पुरुषपादपः ।

पुण्यप्रसूनैः स सदा दशां याति विकासिनीम् ।।१३

अनन्ताकुलकल्लोला विवर्तावर्तसंकुला ।

प्रवहत्याशयारण्ये तृष्णान्धानां नदी नृणाम् ।। १४

तृष्णयेमे जनाः सर्वे सूत्रयन्त्रपतत्रिवत् ।

भ्राम्यन्ते प्रविशीर्यन्ते संह्रियन्ते च भूरिशः ।। १५

मूलान्यपि सुसूक्ष्माणि कठिनाशयकर्कशा ।

तृष्णा परशुधारेव वल्गन्ति विनिकृन्तति ।। १६

निपतत्यवटे मूढस्तृष्णामनुसरज्जनः ।

नीलामनुपतञ्छवभ्रतृणशाखां यथैणकः ।। १७

नोन्मत्तापि जरा चक्षुस्तथा जरयति क्षणात् ।

यथा जरयति क्षामा तृष्णा हृदयरूपिका ।। १८

तृष्णयाशयकौशिक्या हृद्यमङ्गलभूतया । ।

रूढया भगवानेष विष्णुर्वामनतां गतः ।। १९

कयाचिदेव दैविक्या हृदि ग्रथितयानया ।

तृष्णया भ्राम्यते व्योम्नि रज्ज्वेवार्कोऽन्वहं किल ।। २०

सर्वदुःखमयाकारां जगतीजीवनच्छिदम् ।

तृष्णां परिहरेत्क्रूरामुरगीमिव दूरगः ।। २१

तृष्णया वायवो वान्ति शैलास्तिष्ठन्ति तृष्णया ।

तृष्णयैव धरा धात्री त्रैलोक्यं तृष्णया धृतम् ।। २२

सर्वैव लोकयात्रेयं प्रोता तृष्णावरत्रया ।

रज्जुबन्धाद्विमुच्यन्ते तृष्णाबन्धान्न केचन ।। २३

तस्माद्राघव तृष्णां त्वं त्यज संकल्पवर्जनात् ।

मनस्त्वकल्पनं नास्ति निर्णीतमिति युक्तितः ।। २४

अयं त्वमहमित्येव प्रथमं तावदाशये ।

मां दुराशां महाबाहो संकल्पय तमोमयीम् ।। २५

एतां दुःखप्रसविनीमनात्मन्यात्मभावनाम् ।

न भावयसि चेद्राम तदा तज्ज्ञेषु गण्यसे ।। २६

एतामहंभावमयीमपुण्यां

छित्त्वानहंभावशलाकयैव ।

स्वभावनां भव्य भवान्तभूमौ

भवाभिभूताखिलभूतभीतिः ।। २७

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मोक्षोपायेषूपशमप्रकरणे तृष्णावर्णनं नाम पञ्चदशः सर्गः ।। १५ ।।